कक्षा - 10
विषय - संस्कृतम्

समयः — होरात्रयम्          पूर्णाङ्काः — 80

प्र०1 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि निर्देशानुसारं लिखत—
भारतवर्षे बहूनि दर्शनीयानि तीर्थस्थानानि सन्ति। यानि दृष्ट्वा जीवनं पवित्रं भवति। मनः च प्रसन्नं भवति। तेषु एवं तीर्थस्थानेषु एकं तीर्थस्थानमस्ति कन्याकुमारी। इदं तीर्थस्थानं भारतस्य दक्षिणे कोणे विराजते। देव्याः कन्याकुमार्याः सान्निध्येन पावनमिदं तीर्थस्थानम्। अरबसागर-हिन्दमहासागराभ्यां परिवृतं स्थानमिदं प्राकृतिक-सौन्दर्यपरिपूर्णं वर्तते। तत्र स्थित्वा सूर्योदयस्य सूर्यास्तस्य च दृश्यं द्रष्टुं सुकरं भवति। पूर्णिमायां तिथौ तु सायं पूर्वस्यां दिशि चन्द्रोदयः पश्चिमायां च सूर्यास्तं युगपदेव अवलोक्यते। तत्र पर्यटितुं क्रीडितुं वा विस्तृतं समुद्रतटं वर्तते।

1. एकपदेन उत्तरत—
(क) भारतस्य दक्षिणे कोणे किम् तीर्थस्थानं वर्तते?
(ख) कस्याः सान्निध्येन पावनमिदं तीर्थस्थानम्?

2. पूर्णवाक्येन उत्तरत—
(क) कस्य दर्शनं युगपदमेव भवति?

3. निर्देशानुसारम् उत्तरत—
(क) 'दर्शनीयानि तीर्थस्थानानि सन्ति' – अत्र क्रियापदं किम्?
(ख) 'जीवनं पवित्रम्' इत्यनयोः विशेष्यपदं किम्? चिनुत? (1×5 = 5)
(i) यानि (ii) जीवनम् (iii) पवित्रम् (iv) भवति

प्र०2 मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयित्वा स्व-अनुजस्य कृते पत्रं लिखत—
[त्वम्, पत्रम्, पित्रोः, संस्कृतविषयस्य, अनुज, आशिषः, सिध्यन्ति, शोभनः, तव, प्राप्ताः]

प्रिय (i) ______ रमेशः,
सस्नेहं (ii) ______ ।
ह्यः अहम् तव (iii) ______ प्राप्तवान्। (iv) ______ परीक्षापरिणामः (v) ______ अस्ति, परं संस्कृतविषये भवता न्यूना अंकाः (vi) ______ इति सखेदं मया पठितम्। (vii) ______ प्रतिदिनं प्रातः-काले उत्थाय (viii) ______ अभ्यासं कुरु, संस्कृताध्यापकं च पुनः पुनः प्रश्नान् पृच्छ। अभ्यासेन एव सर्वाणि कार्याणि (ix) ______ । (x) ______ चरणयोः सादरं प्रणामः।
भवतः अग्रजः
श्रीरामः।

($\frac{1}{2}$×10 = 5)

कृ०प० उ०

Downloaded from cclchapter.com

प्र०3 अधोलिखितेषु विषयेषु एकं विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिख्यन्ताम्—

(क) हिमाचल प्रदेशः (ख) पर्यावरणम् (ग) मम प्रियं मित्रम् । (5)

प्र०4 अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिविच्छेदपदं वा प्रदत्त-विकल्पेभ्यः चिनुत ।

(क) जानाम्यहम् तस्य नामधेयम् ।

(1) जाना + म्यहम् (2) जानाम्य + अहम्

(3) जानामि + अहम् (4) जानामि + यहम्

(ख) वानरः पुनः वृक्षोपरि आरोहति ।

(1) वृक्ष + उपरि (2) वृक्षो + परि

(3) वृक्षस्य + उपरि (4) वृक्ष + औपरि

(ग) भवतामत्र स्वागतम् ।

(1) स्व + गतम् (2) सु + आगतम्

(3) स्व + अगतम् (4) स्वा + गतम्

(घ) यदि + अपि नीरं सर्वत्र ।

(1) यदिपि (2) यद्यापि

(3) यद्यपि (4) यदपि

(ङ) हित + उपदेशः कथानां संग्रहः अस्ति ।

(1) हितोपदेशः (2) हितूपदेशः

(3) हितपदेशः (4) हितापदेशः (1 x 5 = 5)

प्र०5 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं प्रदत्त-विकल्पेभ्यः चिनुत ।

(क) अत्र कोलाहलः न कृ + तव्यत् ।

(1) कर्तव्याः (2) कर्तव्यः

(3) कर्तव्या (4) कर्तव्यम्

कृ०प०उ०

Downloaded from cclchapter.com

(ख) मुद् + शानच् ते नृत्यन्ति।

(1) मोदमान: (2) मोदमाना:

(3) मोदमानम् (4) मोदमाने

(ग) सिंह: मृगं खादित्वा धावति।

(1) खाद् + क्त (2) खादि + त्वा

(3) खाद् + क्त्वा (4) खाद् + तुमुन्

(घ) चौर: वृक्षम् आलम्ब्य भवनाद् अध: अवातरत्।

(1) आ + लम्ब् + ल्यप् (2) आ + लम्ब् + य

(3) आ + लम्ब् + क्त (4) आ + लम्ब् + अनीयर्

(ङ.) गम् + शतृ बालक: गुरुं नमति।

(1) गच्छत् (2) गच्छति

(3) गच्छन् (4) गच्छन्ती (1x5 = 5)

प्र०6 यथानिर्दिष्ट-धातूनां शब्दानां च समुचितं पदपरिचयं प्रदत्तेभ्य: विकल्पेभ्य: चिनुत।

(क) तिष्ठन्तु इत्यस्य पद-परिचयम्—

(1) तिष्ठ धातो:, लृट्लकार:, उत्तम-पुरुष:, बहुवचनम्।

(2) स्था धातो:, लोट्लकार:, मध्यम-पुरुष:, एकवचनम्।

(3) स्था धातो:, लोट्लकार:, प्रथम-पुरुष:, बहुवचनम्।

(4) स्था धातो:, लोट् लकार:, प्रथम-पुरुष:, एकवचनम्।

(ख) पश्याम: इत्यस्य पद-परिचयम्—

(1) दृश् धातो:, लृट् लकार:, उत्तम-पुरुष:, बहुवचनम्।

(2) दृश् धातो:, लट् लकार:, उत्तम-पुरुष:, बहुवचनम्।

(3) दृश् धातो:, लृट् लकार:, उत्तम-पुरुष:, द्विवचनम्।

(4) दृश् धातो:, लृट् लकार:, उत्तम-पुरुष:, एकवचनम्।

(ग) पिब इत्यस्य पद-परिचयम्—

(1) पिब् धातो:, लोट्लकार:, प्रथम-पुरुष:, बहुवचनम्।

(2) पा धातो:, लोट्लकार:, मध्यम पुरुष:, एकवचनम्।

(3) पा धातो:, लोट् लकार:, प्रथम-पुरुष:, बहुवचनम्।

(4) पा धातो:, लोट् लकार:, प्रथम-पुरुष:, एकवचनम्।



Downloaded from cclchapter.com

(घ) सीतायै इत्यस्य पद-परिचयम्—

(1) सीता शब्दः, स्त्रीलिङ्गः, प्रथमा विभक्तिः, एकवचनम्।

(2) सीता शब्दः, स्त्रीलिङ्गः, द्वितीया विभक्तिः, द्विवचनम्।

(3) सीता शब्दः, स्त्रीलिङ्गः, चतुर्थी विभक्तिः, एकवचनम्।

(4) सीता शब्दः, स्त्रीलिङ्गः, पञ्चमी विभक्तिः, बहुवचनम्।

(ङ) नद्यः इत्यस्य पद-परिचयम्—

(1) नदी शब्दः, स्त्रीलिङ्गः, प्रथमा विभक्तिः, बहुवचनम्।

(2) नदी शब्दः, स्त्रीलिंगः, द्वितीया विभक्तिः, द्विवचनम्।

(3) नदी शब्दः, स्त्रीलिंगः, प्रथमा विभक्तिः, बहुवचनम्।

(4) नदी शब्दः, स्त्रीलिंगः, तृतीया विभक्तिः, एकवचनम्। (1×5 = 5)

प्र०7 अधोलिखित समयं संस्कृत-भाषायां लिखत—

(क) 2:00 बजे

(ख) 4:30 बजे

(ग) 5:45 बजे

(घ) 8:15 बजे

(ङ) 3:45 बजे (1×5 = 5)

प्र०8 कोष्ठकात् उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत—

(क) पाण्डवाः _____ आसन्। (पञ्च/पञ्चः)

(ख) वेदाः _____ सन्ति। (चत्वारः/चत्वारि/चतस्रः)

(ग) तानि _____ फलानि सन्ति। (त्रयः/तिस्रः/त्रीणि)

(घ) _____ नारी भोजनं पचति। (एकः/एका/एकम्)

(ङ) अत्र ____ वृक्षौ स्तः। (द्वौ/द्वे) (1×5 = 5)

प्र०9 निम्नलिखितेषु वाक्येषु समासं अधिकृत्य समस्त पदं विग्रहं वा लिखीयन्ताम्।

(क) सः _____ नाटकं पठति। (भासविरचित)

(ख) राधा _____ न वदति। (असत्यम्)

(ग) मन्त्री _____ आसीत्। (नीतौ निपुणः)

(घ) _____ नदी वहति। (ग्रामस्य समीपे)

(ङ) सः ____ सेवां करोति। (यथाशक्ति) (1×5 = 5)

Downloaded from cclchapter.com

प्र०10 अधोलिखित- पठितम् अनुच्छेदं अधिकृत्य निर्देशित- प्रश्नानाम् उत्तराणि दीयन्ताम्।
वनस्य दृश्यं समीपे एवैका नदी वहति। एक: सिंह: सुखेन विश्राम्यते। तदैव एक: वानर: आगत्य तस्य पुच्छं धुनाति। क्रुद्ध: सिंह: तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षम्- आरूढ:। तदैव अन्यस्मात् वृक्षात् अपर: वानर: सिंहस्य कर्णमाकृष्य पुन: वृक्षोपरि आरोहति। एवमेव वानरा: वारं-वारं सिंहं तुदन्ति। क्रुद्ध: सिंह: इतस्तत: धावति, गर्जति परं किमपि कर्तुम् असमर्थ: एव तिष्ठति।

1. एकपदेन उत्तरत —
(क) क: सुखेन विश्राम्यते?
(ख) वानर: कुत्र आरूढ:?

2. पूर्णवाक्येन उत्तरत —
(क) वानर: किं कृत्वा वृक्षोपरि आरोहति?

3. निर्देशानुसारम् उत्तरत —
(क) 'अन्य:' इति पदस्य समानार्थकपदं गद्यांशात् चित्वा लिखत।
(ख) 'इतस्तत:' इत्यस्य सन्धि-विच्छेदं लिखत। (1x5 = 5)

प्र०11 अधोलिखित गद्यांशं हिन्दी भाषायां लिखत —
विचित्रा दैवगति:। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौर: गृहाभ्यन्तरं प्रविष्ट:। तत्र निहितामेकां मञ्जूषाम् आदाय पलायित:। चौरस्य पादध्वनिना प्रबुद्धोऽतिथि: चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौर: एव उच्चै: क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धा: ग्रामवासिन: स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुष: तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्। (5)

प्र०12 अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।
एक एव खगो मानी वने वसति चातक:।
पिपासितो वा म्रियते याचते वा पुरन्दरम्॥

1. एकपदेन उत्तरत —
(क) चातक: कीदृश: खग: अस्ति?
(ख) चातक: कुत्र वसति।



Downloaded from cclchapter.com

२. पूर्णवाक्येन उत्तरत —
(क) पिपासितः चातकः किं करोति ?

३. निर्देशानुसारम् उत्तरत —
(क) 'इन्द्रम्' इत्यर्थे प्रयुक्तं पदं किम् ?
(ख) 'दीनः' इत्यस्य प्रयुक्तं विलोमपदं किम् ? (1×5 = 5)

प्र०13 अधोलिखित पद्यांशस्य हिन्दी-सरलार्थं लिखत —
विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ॥ (1×5 = 5)

प्र० 14 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत —
(क) सर्वे प्रकृतिमातरं प्रणमन्ति ।
(ख) उद्याने पक्षिणां कलरवं चेतः प्रसादयति ।
(ग) बुद्धिमती चपेटया पुत्रौ प्रहृतवती ।
(घ) शरीरस्य आयासजननं कर्म व्यायामः इति कथ्यते ।
(ङ) सुराधिपः ताम् अपृच्छत् । (1×5 = 5)

प्र० 15 अधोलिखित विलोम पदानां समुचितं मेलनं कुरुत —

| | |
|---|---|
| (क) प्रसीदति | (1) दुर्लभः |
| (ख) मूर्खः | (2) निरर्थकम् |
| (ग) अस्ते | (3) सुधी |
| (घ) सुलभः | (4) प्रकुप्यति |
| (ङ) सार्थकम् | (5) उदये |

(1×5 = 5)

प्र०16 मञ्जूषातः चित्वा पदानां पर्यायपदं लिखत —
[ जलम् , वक्रम् , प्रस्तरम् , देहम् , रसालम् ]
(क) आम्रम् — ______
(ख) सलिलम् — ______
(ग) कुटिलम् — ______
(घ) पाषाणम् — ______
(ङ) शरीरम् — ______ (1×5 = 5)

डा० विपन कुमार शर्मा
रा०उ०पा० नरेली (हमीरपुर)
मो० न० 9418756640
8219975040.
दिनांक - 30-जनवरी-2023

Downloaded from cclchapter.com